## अष्टमाध्यायस्य

## द्वितीयः पादः

### पूर्वत्रासिद्धम्। (१/१२)

पूर्वत्रासिद्धम् इत्यधिकारोऽयम् आ अध्यायपरिसमाप्तेः। [1]यद् इत ऊर्ध्वमनुक्रमिष्यामः पूर्वत्रासिद्धम् इत्येवं तद् वेदितव्यम्। तत्र येयं [2]सपादसप्ताध्यायी अनुक्रान्ता, एतस्यामयं पादोनोऽध्यायोऽसिद्धो भवति। इत उत्तरं च उत्तर उत्तरो योगः पूर्वत्र पूर्वत्रासिद्धो भवति [3]असिद्धवद् भवति। सिद्धकार्यं न करोति इत्यर्थः। तदेत[4]दसिद्धत्ववचनमादेशलक्षणप्रतिषेधार्थम्, उत्सर्गलक्षणभावार्थं च। अस्मा उद्धर, द्वा अत्र, द्वा आनय, असा आदित्यः इत्यत्र [5]व्यलोपस्यासिद्धत्वात्, 'आद् गुणः' (६.१.८७/६९) इति, 'अकः सवर्णे दीर्घः' (६.१.१०१/८५) इति[6] च न भवति। अमुष्मै, अमुष्मात्, अमुष्मिन् इति उत्वस्य असिद्धत्वात् स्मायादयो भवन्ति।

शुष्किका शुष्कजङ्घा च क्षामिमा[7]नौजढत्तथा।
मतोर्वत्वे झलां जश्त्वे गुडलिण्मान् निदर्शनम्॥

शुष्किका इत्यत्र 'शुषः कः' (८. २. ५१/३०३०) इत्य[8]स्यासिद्धत्वाद् 'उदीचामातः स्थाने यकपूर्वायाः' (७.३.४६/४६५) इत्येतन्न भवति। शुष्कजङ्घा इति 'न कोपधायाः' (६. ३. ३७/८३८) इति पुंवद्भावप्रतिषेधो न भवति। क्षामिमान् इति क्षामस्य अपत्यं क्षामिः, [9]क्षामो वा अस्य अस्ति इति क्षामी, क्षामिः क्षामी वा यस्य अस्ति इति क्षामिमान्। [10]क्षायो मः (८. २. ५३/३०३२) इत्यस्यासिद्धत्वान् मादुपधायाश्च (८.२.९/१८९७) इति वत्वं न भवति। [11]औजढत् इति वहेर्निष्ठायामूढः, तमाख्यत् इति णिच्, तदन्ताल् [12]लुङ्, 'चङि' (६.१.११/२३१५) इति [13]द्विर्वचने कर्तव्ये ढत्वधत्वष्टुत्व[14]ढलोपानामसिद्धत्वाण् णौ च यः टिलोपः, तस्य स्थानिवद्भावात् ढत [15]इत्येतद् द्विरुच्यते। अनग्लोपे (७.४.९३/२३१६) इति [16]प्रतिषेधात् सन्वदित्वं नास्ति, तेन औजढत् इति भवति। [17]औजिढत् इत्येतत् तु क्तिन्नन्तस्य उढिशब्दस्य भवति। गुडलिण्मान् इति गुडलिहोऽस्य सन्ति इति मतुप्, तत्र ढत्वजश्त्वयोरसिद्धत्वात् 'झयः' (८.२.१०/१८९८) इति वत्वं न भवति।

---

1. यान् ब. 2. सपादा ह. 3. असिद्धवद् भवति नास्ति ब. 4. असिद्धवचनम् क. ह. 5. यवलोपस्य ब. क. 6. दीर्घवचनम् इत्यधिकम् क. 7. औनडादयः क. 8. अत्र क. 9. ततो मतुप् ह. 10. वाक्यमिदं नास्ति क. 11. आजढत् ब, नास्ति क. 12. लुङि चङि ब, ण्यन्ताल् लुङ् इ. 13. द्वित्वे ब. 14. ढलोपादीनाम् इ. क. 15. इति द्विरुच्यते ब. 16. च इत्यधिकम् क.